# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – १** | **गुणाः – ५०** |
| **विषयः – अनिवार्यसंस्कृतम्** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १३/०७/२०२१** | **सन्दर्भग्रन्थः – संस्कृतसाहित्ये विज्ञानम्** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः उत्तरं लिखत।**

१ वेदेषु जीवविज्ञानम्।
२ पतञ्जलिः।
३ आयुर्वेदीयाचार्याणां परिचयः।
४ आयुर्वेदोत्पत्तिः।

**प्रश्नः २** नागार्जुनस्य परिचयं लिखत।

**प्रश्नः ३** वेदे प्रतिपादितान् पर्यावरणस्य संरक्षणस्य उपायान् लिखत।

**प्रश्नः ४** आयुर्वेदस्य उद्भवः विकासश्च, इत्यस्मिन् विषये विलिख्य कायचिकित्सां प्रतिपादयत।

**प्रश्नः ५** वृक्षायुर्वेदस्य वर्णनं कुरुत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः उत्तरं लिखत।**

१ लिपिशास्त्रस्योद्भवः।
२ ग्रीमस्य ध्वनिनियमः।
३ स्कन्दगुप्तस्य शिलालेखः।
४ अर्थपरिवर्तनस्य कारणानि।

**प्रश्नः ७** देवनागरीविषये विलिख्य रुद्रदाम्नः शिलालेखस्य परिचयं यच्छत।

**प्रश्नः ८** लिपीनां परिचयं विलिख्य ब्राह्मी शारदा इत्यनयोः विवरणं कुरुत ।

**प्रश्नः ९** भाषाविज्ञानस्याङ्गानि विवृणुत ।

**प्रश्नः १०** भाषाविज्ञानस्य परिचयं विलिख्य ध्वनिनियमान् लिखत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ आयुर्वेदागमस्य विभागः कत्यङ्गेषु जातः ?
२ आयुर्वेदसंहितायाः रचना केन कृता ?
३ भास्कराचार्यः कस्मिन् ग्रन्थे पृथिव्याः गोलत्वमिति स्वीकृतवान् ?
४ वृक्षायुर्वेदे पादपानां जन्म कतिविधं मन्यते ?
५ वेदपुरुषस्य नेत्रं किं मन्यते ?
६ शारदालिपिः कस्य प्रदेशस्य पुरातनी लिपिः ?
७ देवनागरीलिप्यां कति स्वराः सन्ति ?
८ भाषाविज्ञानं किमस्ति ?
९ भाषायाः विकासस्य कति सोपानानि ?
१० प्राचीनतमः भाषावैज्ञानिकः कः ?
११ अष्टाङ्गहृदयस्य रचयिता कः ?
१२ 'व्यक्ता वाचि वर्णा येषां त इमे व्यक्त वाचः' इति कस्योक्तिः ?
१३ भाषाणां वर्गीकरणं कतिविधं कृतम् ?
१४ शरीरविज्ञानस्य विधिः कस्मिन् वेदे प्रतिपादितः ?
१५ सुश्रुतसंहिता कत्याध्यायेषु विभक्ता ?

****